संस्कृत-वार्ता:
16.06.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- गृहमंत्री अमितशाह: जम्मूकश्मीरे सुरक्षास्थितिं समीक्षितुं अद्य नवदिल्ल्यां एकम् उच्चस्तरीयोपवेशनं विहितवान्।
- सर्वकार: आपराधिक-न्यायिक-प्रणाल्या: प्रशासने भारतीय: प्रगतिवान् पन्था: इति शीर्षकेण अद्य कोलकातायां सम्मेलनम् आयोजितवान्।
- सिक्किमप्रदेशे अत्यधिक-वृष्ट्या भूस्खलनेन च अवरूद्धानां द्वादश-शताधिकानां देशीयानां पर्यटकानां पञ्चदश च वैदेशिक-पर्यटकानां निष्कासनकार्यं अद्य विधीयते।
- ऋतुविभागेन देशस्य उत्तर-पश्चिमीयभागेषु मध्यवर्तिषु पूर्वीयेषु च भागेषु अद्य भीषण-ग्रीष्मस्य नारङ्ग-रक्त-वार्णिकी जनसंचतेना प्रसारिता।
- टेनिस् स्पर्धायां अद्य सायं इटलीदेशस्य एटीपी चैलेन्जर स्पर्धायां पुरूषाणाम् एकल स्पर्धाया: अन्तिमचक्रे भारतीय-क्रीडकस्य सुमित-नागलस्य प्रतिस्पर्धा इटली-देशीयेन लुसियानो डार्डेरी इत्यनेन सह भविष्यति।

<u>गृहमन्त्री-उपवेशनं</u>

गृहमंत्री अमितशाह: जम्मूकश्मीरे सुरक्षास्थितिं समीक्षितुं अद्य नवदिल्ल्यां एकम् उच्चस्तरीयोपवेशनं विहितवान्। एतस्मिन् उपवेशने असौ केन्द्रशासितप्रदेशे अधुनावधौ जातं आतङ्कीयाक्रमणं निधाय सुरक्षास्थितिं परिचर्चितवान्। उपवेशने जम्मूकश्मीरस्य उपराज्यपाल: मनोजसिन्हा:, राष्ट्रीय-सुरक्षा-परामर्शदः अजीत डोभालः, केंद्रीय-गृह-सचिवः अजयभल्ला: जम्मू-कश्मीर-प्रशासनस्य वरिष्ठ अधिकारिणः च आसन्।

<u>प्रशासनं-त्रय: नवीन विधय:</u>

सर्वकार: आपराधिक-न्यायिक-प्रणाल्या: प्रशासने भारतीय: प्रगतिवान् पन्था: इति शीर्षकेण अद्य कोलकातायां सम्मेलनम् आयोजितवान्। केन्द्रीय-विधि-न्याय-मत्री च अर्जुन-राम-मेघवाल: सम्मेलनस्य उद्घाटनं कृतवान्। स: उक्तवान् यत् एते त्रय: आपराधिक-विधय: विहिता: मेघवाल: अग्रे प्रोक्तवान् यत् यथास्थिति: यथासमयं च विधिषु परिवर्तनानि आवश्यकानि सन्ति।

## सिक्किम-साहाय्योद्धारकार्यम्

सिक्किमप्रदेशे अत्यधिक-वृष्ट्या भूस्खलनेन च मंगनजनपदस्य लाचुंग-चुंगथांग-स्थलयो: अवरूद्धानां द्वादश-शताधिकानां देशीयानां पर्यटकानां पञ्चदश च वैदेशिक-पर्यटकानां निष्कासनकार्यं अद्य विधीयते। मंगनजनपदस्य जनपदाधिकारी हेमकुमार-छत्री इत्येष: आकाशवाणीं संसूचितवान् यत् प्रतिकूलऋतो: प्रभावेन अवद्धानां जनानां कृते वैमानिकी-सेवापि नैव सम्भाव्यते। अपि च विविधेषु स्थानेषु मार्गसम्पर्का: अवरूद्धा: जाता:। नैरन्तर्येण वृष्ट्या: नवजना: मृत्युम् उपगता:।

## ऋतु-विभाग:

ऋतुविभागेन देशस्य उत्तर-पश्चिमीयभागेषु मध्यवर्तिषु पूर्वीयेषु च भागेषु अद्य भीषण-ग्रीष्मस्य नारङ्ग-रक्त-वार्णिकी जनसंचतेना प्रसारिता। उत्तर-प्रदेश-पंजाब-हरियाणा-चंडीगढ-दिल्ली-बिहार-झारखण्ड-प्रदेशानां केषुचित् भागेषु आगामिनं द्विदिवसं यावत् ऊष्णतापस्य, भीषण-ग्रीष्मस्य प्रकोप: भविष्यति। हिमाचल-प्रदेश-राजस्थान, मध्यप्रदेश-छत्तीसगढ-उत्तराखण्ड प्रदेशेषु जूनमासस्य अष्टादश दिनाङ्क यावत् ईदृशी स्थिति: भविष्यति।

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी आकाशवाण्या: "मन की बात" इति कार्यक्रमे अस्य मासस्य त्रिंशत् दिनाङ्के देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं एकादशाधिकैक-संस्करणं भविता। अस्य कार्यक्रमस्य प्रसारणं आकाशवाण्याः दूरदर्शनस्य च सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारणमन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषाष्वपि श्रोतुं शक्यते। जना: निजविचारान् परामर्शान् च नि:शुल्क दूरभाषसंख्यायाम् 1800-11-7800 इत्यत्र प्रेषितुम् शक्नुवन्ति।

## कृषि-शिवराज:

केन्द्रीय-कृषिमन्त्री शिवराजसिंहचौहान: प्रोदीरितवान् यत् प्रधानमन्त्री नरेन्द्रमोदी जूनमासस्य अष्टादश दिनांके किसान-सम्मान-निधि-योजनाया: अन्तर्गतं त्रिलक्षाधिक-नवकोटि-कृषकाणां वित्तकोषे भूयोऽपि विंशति सहस्रकोटिरूप्यकाणि हस्तान्तरितं करिष्यति। नवदिल्ल्यां श्रीचौहान: अकथयत् यत् व्यतीतेषु दशसु वर्षेषु साम्प्रतं यावत् एकादशकोटि-कृषकाणां वित्तकोषेषु त्रि-लक्ष-कोटि-रूप्यकाणि सम्प्रेषितानि। असौ जूनमासस्य अष्टादशदिनांके प्रधानमन्त्रिण: कार्यक्रमेऽस्मिन् सम्मिलितुं सर्वेभ्य मुख्यमन्त्रिभ्य: पत्रं लिखितवान्। सः प्रकाशितवान् यत् असौ ग्रामीणविकासः कृषिः तथा कृषककल्याणमन्त्रीरूपेण

प्रभारं स्वीकृत्य मन्त्रालयस्य अधिकारिभिः सह चर्चां कृत्वा कृषकाणां कल्याणसम्बद्धेषु प्रत्येकस्मिन् महत्त्वपूर्णेषु विषयेषु कार्यं कुर्वन् अस्ति। चौहानमहोदयः अवदत् यत् सः नूतनसर्वकारस्य शतदिवसीययोजनायाः अन्तर्गतं स्वमन्त्रालयस्य कार्ययोजनायाः अपि समीक्षां कृतवान्।

## गङ्गादशहरा

अद्य गङ्गादशहरा पर्व परिपाल्यते। अस्मिन् शुभावसरे उत्तरप्रदेशस्थिते प्रयागराजे वाराणस्यां अथ च हरिद्वारे गढमुक्तेश्वरे विभिन्नेषु गङ्गाया: घट्टेषु श्रद्धालव: पूजार्चनां स्नानं च कुर्वन्ति। अपि च, उत्तरप्रदेशे आरक्षिदलै: विभिन्नेषु पवित्रस्थानेषु सुरक्षाया: सुदृढा व्यवस्था विहिता।

## रेलवे-वन्देभारतम्

वन्देभारत-रेलयानस्य शयनयानश्रेण्या: परीक्षणं आगामिनि मासद्वये समारप्स्यते। वर्तमानसमये रेलविभागेन वन्देभारत-एक्सप्रेसयानं प्रचाल्यते यस्मिन् केवलम् आसन्दा: एव स्थापिता: सन्ति। रेलमन्त्री अश्विनी वैष्णव: प्रोक्तवान् यत् वन्देभारत-शयनयानश्रेण्या: सततं अभ्यर्थनं संवर्धति। अवधेयं वर्तते यत् वन्देभारतरेलयानं स्वदेशेनिर्मितं प्रथमं अर्द्धोच्चगतियुतं रेलयानं वर्तते। मन्त्रिणा निगदितं यत् आगामिषु पञ्चवर्षेषु प्रशासनं रेलगत-आधारभूत सरञ्चनानां विकासार्थं यात्रिभ्य: सौविध्यप्रदानाय प्रतिबद्धं भविष्यति।

## जम्मू-कश्मीर-उपराज्यपालः

जम्मू-कश्मीरस्य उपराज्यपालः मनोजसिन्हा: जम्मू-कश्मीर-राज्ये आतङ्कवादीनां आधारभूतसंरचनानां विनाशार्थं सुरक्षासंस्थाभिः सह समन्वयेन कार्यान्वयनं कर्तुं प्रशासनाय निर्देशं दत्तवान्। तेन प्रोक्तं यत् ये आतंकवादं वर्धापयन्ति समर्थयन्ति वा तैः सह कठोररूपेण व्यवहारः भविष्यति ।

ह्यः श्रीनगरनगरे उच्चस्तरीयोपवेशने उपराज्यपालः प्रशासनेन सह श्री अमरनाथयात्रायाः, योगदिवसस्य ईद-उल-अजहा- पर्वणः च सज्जतायाः विषये चर्चां कृतवान्।

## प्रेरणा-स्थल

उपराष्ट्रपति: राज्यसभाया: सभापति: जगदीपधनखड: अद्य संसद्-भवन-परिसरे नव-निर्मितस्य प्रेरणा-स्थलस्य उद्घाटनं करिष्यति। कार्यक्रमाय लोकसभाया: राज्यसभाया: सर्वे सदस्या: आमन्त्रिता:। प्रेरणास्थलस्य निर्माणं संसद्-भवन' परिसरे महतां नेतृणां स्वाधीन-संग्रामिणां च एकस्मिन् एव स्थाने श्रद्धांजलिं अर्पयितुम् कृतम्।

## टेनिस

टेनिस् स्पर्धायां अद्य सायं इटलीदेशस्य एटीपी चैलेन्जर स्पर्धायां पुरूषाणाम् एकल स्पर्धाया: अन्तिमचक्रे भारतीय-क्रीडकस्य सुमित-नागलस्य प्रतिस्पर्धा इटली-देशीयेन लुसियानो डार्डेरी इत्यनेन सह् भविष्यति।

।। इति वार्ता: ।।